**दिनाङ्क :- 07.05.2026**

**प्रात: - 06:55**

**अथ वार्ताः**

**प्रधानमन्त्री-वियेत्नाम राष्ट्रपतिः**

भारत-वियतनाम देशयोर्मध्ये डिजिटल- प्रौद्योगिकी, दुर्लभखनिजाः, सार्वजनिकक्षेत्रस्य लेखापरीक्षा, डिजिटलव्यवहारः, संस्कृतिः, पर्यटनं इत्यादिषु बहुविध-क्षेत्रेषु सन्धयः कृताः । नवदिल्ल्यां प्रधानमन्त्री नरेन्द्रमोदी अथ वियतनाम-राष्ट्रपतिः टो लाम्- इत्यनयोः मध्ये द्विपक्षीय-वार्तायाः अनन्तरं सन्धि-विज्ञप्ति-पत्रेषु हस्ताक्षराणि कृतानि । संयुक्तवक्तव्ये प्रधानमन्त्रिणा श्रीमोदिना प्रोक्तं यत् व्यापकविमर्शानन्तरं पक्षद्वयेन स्वसम्बन्धं वर्धित-व्यापक-रणनीतिक-सहयोग-पर्यन्तं अग्रे साधयितुं निर्णयः कृतः ।

**राष्ट्रपति-वियतनाम**

राष्ट्रपतिः द्रौपदी मुर्मूः ह्यः सायं राष्ट्रपतिभवने स्वस्य वियतनाम-समकक्षस्य टो लाम् इत्यस्य स्वागतं कृतवती । आगन्तुकस्य गणमान्यस्य सम्मानार्थं सा भोजम् अपि आयोजितवती । राष्ट्रपतिः अवदत् यत् भारत-वियतनाम-सम्बन्धस्य उन्नतव्यापक-रणनीतिक-सहयोगस्य अभिवर्धनं, न केवलं द्विपक्षीय-सहकार्यस्य गतिं प्रदास्यति, अपितु क्षेत्रे शान्ति-समृद्धौ अपि योगदानं करिष्यति।

**राजनाथ-सम्मेलनम्**

रक्षामन्त्री राजनाथ सिंहः एवं रक्षा-प्रमुखः जनरल अनिल चौहानः अद्य जयपुरे संयुक्त-सेनापति-सम्मेलनस्य द्वितीय-संस्करणस्य शोभां वर्धयिष्यतः । द्विदिवसीय-सम्मेलनस्य अस्य मुख्यविषयो वर्तते 'नूतन-क्षेत्रेषु सैन्यक्षमता' इति।

**पश्चिम-बंगाल**

एकस्मिन् उद्वेगकर घटनायां, पश्चिमबङ्गालस्य उत्तर-चतुर्विंशतिः-परगण-मण्डलस्य मध्यग्रामे भाजपा-दलस्य नेता सुवेन्दु अधिकारी इत्यस्य निकट-सहायकः चंद्रनाथ-रथः, अज्ञात-आक्रमणकारिभिः भुशुण्डिकया प्रहृतः। समाचारानुसारं गतरात्रौ दोहरियानगरे मोटर-बाइक-चालकाः दुष्टाः तस्य कार-यानस्य उपरि यथेच्छं गोलिकाप्रहारं कृतवन्तः। चन्द्रनाथं तत्क्षणमेव स्थानीयचिकित्सालये प्रेषितः परन्तु सः मृतः इति घोषितः। तस्य चालकः बुद्धदेब-बेरा अपि गोलिकाभिः बहुधा व्रणितः अथ गम्भीरस्थितौ कोलकाता-चिकित्सालये स्थानान्तरितः अस्ति ।

**अमेरिका-ईरानः**

पश्चिम एशियायां संघर्षस्य निवारणाय अमेरिका-ईरान-देशौ प्रारम्भिक-सहमतस्य समीपे गच्छन्तः सन्ति, यथा क्षेत्रीयस्रोताः वदन्ति यत् ज्ञापनपत्रस्य प्रक्रिया सक्रियचर्चायां वर्तते । चतुर्दश-बिन्दुयुक्ता एकपृष्ठीय-प्रतिवेदनस्य रूपरेखा, व्यापक-सहमतस्य, त्रिंशत् दिवसीय-गवाक्षमुद्घाटयति । ईरान देशेन प्रोक्तं यत् सः अद्यापि प्रस्तावस्य समीक्षां कुर्वन् अस्ति । अमेरिका-राष्ट्रपतिः डोनाल्ड ट्रम्पः तु स्थितिः नियन्त्रणे वर्तते इति वर्णयन्, वार्तायाः असफलतायाम्, सैन्यकार्याणि पुनः आरभ्यन्ते इति संचेतनां प्रदत्तवान् ।

**जयशंकर – सूरीनाम**

विदेश मन्त्री डॉ एस.जयशंकर ह्यः परामा-रिबो इत्यत्र तस्य सूरीनाम-समकक्षेन मेलविन् बौवा इत्यनेन सह मिलितवान् । भारतीय-सूरीनाम-प्रतिनिधिमण्डलानि नवम-संयुक्त-आयोगसभायाम्, भारत-सूरीनाम-सम्बन्धानां व्यापकसमीक्षाः आयोजनं कृतवन्तः । तेषु व्यापारः, निवेशः, रक्षा ऊर्जा च, विकाससहायता तथा क्षमतानिर्माणं, स्वास्थ्यं गतिशीलता च, संस्कृतिः इत्यादीनि प्रमुखक्षेत्राणि सम्मिलितानि आसन् । डॉ जयशंकरः विश्वासं प्रकटितवान् यत् तेषां विचारविमर्शस्य परिणामाः भारत-सूरीनाम-सम्बन्धं अधिकं गभीरं विविधं च करिष्यन्ति ।

**बिहार-मन्त्रिमण्डल विस्तार :**

बिहारस्य मुख्यमंत्री सम्राट-चौधरी अद्य तस्य मन्त्रिमण्डलस्य विस्तारं करिष्यति । पटनानगरस्य गान्धी-मैदानम् इत्यत्र अद्य मध्याह्ने द्वादशवादने आयोजयिष्यमाणे, शपथ-ग्रहण-समारोहे प्रधानमन्त्री नरेन्द्रमोदी, केन्द्रीयगृहमन्त्री अमितशाहः, एनडीए-इति राष्ट्रिय-प्रजातान्त्रिक-घटबन्धनस्य अनेके वरिष्ठनेतारः च भागं गृहीष्यन्ति। अस्माकं संवाददात्रा सूचितं यत् पूर्वसर्वकारे अनुसृतस्य सूत्रस्य आधारेण मन्त्रिमण्डलविस्तारः क्रियते। प्रायः पञ्चदश भाजपा-विधायकाः, चतुर्दश जेडियू-विधायकाः मन्त्रीरूपेण शपथं ग्रहीतुं शक्नुवन्ति । तदतिरिक्तं लोकजनशक्तिपक्षस्य (रामविलासस्य) द्वौ मन्त्रिणौ, हिन्दुस्तानी आवाम-मोर्चायाः, राष्ट्रीयलोकमोर्चायाः च एकैकस्य मन्त्रिणः च नियुक्तिः अपेक्षिता अस्ति।

**आईपीएल**

आई.पी.एल. इति विंशतिम्-प्रतिविंशतिः क्रिकेट्-लीग-प्रतिस्पर्धायां, गतरात्रौ, सन-राइसस्-हैदराबाद-दलेन पन्जाब-किंग्स्-दलं त्रयस्त्रिंशत् धावनांकैः पराजितम्। अद्य सायं सार्धसप्तवादने लखनऊ सूपर जायंट्स् अथ रायल् चालेंजर्स बेंगलूरु दलयोर्मध्ये, लखनऊ नगरस्य भारतरत्न-श्री-अटलबिहारी-वाजपेयी एकाना क्रिकेट क्रीडांगणे, प्रतिस्पर्धा भविष्यति।

॥ **इति वार्ता:**॥